CAREERINDIA

## कक्षा – XII
## संस्कृतम् (ऐच्छिकम्) कोड सं – 022)
## आदर्शप्रश्नपत्रम् – 2018-19

**समयः – होरात्रयम्** **पूर्णाङ्काः – 100**

| **निर्देशाः -** | |
|---|---|
| अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति - | |
| खण्डः (क) अपठितांश - अवबोधनम् | - 15 अङ्काः |
| खण्डः (ख) रचनात्मक – कार्यम् | - 15 अङ्काः |
| खण्डः (ग) पठितांश - अवबोधनम् संस्कृतासाहित्येतिहासपरिचयश्च | - 50 अङ्काः |
| खण्डः (घ) छन्दोऽलंकारपरिचयः | - 20 अङ्काः |

www.careerindia.com

| | **खण्डः – क** **अपठितांश - अवबोधनम् 15 अङ्काः** | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -** | 5 अङ्काः |
| | आलस्यं मनुष्याणां दुर्गुणेषु अन्यतमम् । अनेन ग्रस्ताः जनाः 'श्वः करिष्यामः', 'परश्वः करिष्यामः' इति चिन्तयन्तः स्व-कर्तव्यानि उपेक्षन्ते । 'समयः स्वल्पः' इत्यपि तेषाम् अकर्मणः व्याजः भवति। किन्तु, आलस्यं विफलतायाः, कर्मठता च सफलतायाः बीजम् इति यथार्थः । अतः अस्माभिः आलस्यम् अपहाय कर्मपरैः भाव्यम् । उक्तं च – "आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः। | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | ½×2=1 |
| | (i) दुर्गुणेषु अन्यतमं किम्? | |
| | (ii) जनाः कानि उपेक्षन्ते? | |
| | (iii) सफलतायाः बीजं किम्? | |
| | **(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) तेषाम् अकर्मणः व्याजः कः भवति? | |
| | (ii) अस्माभिः कीदृशैः भाव्यम्? | |
| | (iii) शरीरस्थो महान् रिपुः कः? | |
| | **(स) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) 'अनेन' – इति सर्वनाम-स्थाने संज्ञापदं लिखत? | |
| | (ii) 'त्यक्त्वा' – इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम्? | |
| | (iii) सफलतायाः विलोमपदं चित्वा लिखत । | |

| | | |
|---|---|---|
| | | |
| 2. | **निम्नलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>सत्यनिष्ठता मानवानां महत्तमो धर्मः । सत्यनिष्ठानां जनानां मनोबलं सदा समुन्नतं तिष्ठति । जगति ख्यातनामानो महापुरुषाः सत्यमार्गं समाश्रित्यैव महतो महल्लक्ष्यं साधितवन्तः । राज्ञो हरिश्चन्द्रस्य जीवनकथां के न जानन्ति । महात्मा गान्धी केषां सचेतसाम् अपरिचितः । असत्यपथमारूढाः जनाः एकमसत्यं गोपयितुं शतमसत्यानि भणन्ति, समाजे उपहसनीयाश्च जायन्ते । सत्यमाश्रिताः पुनः सर्वतोऽभ्युदयेन युज्यन्ते । ते तत्कालम् असद्भिः प्रपीड्यमानाः अपि पर्यन्ते सदा विजयन्ते । अत एवोक्तं शास्त्रकारैः – "नहि सत्यात् परो धर्मः" इति । | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) महत्तमो धर्मः कः?<br>(ii) सत्यनिष्ठानां किं समुन्नतं तिष्ठति?<br>(iii) कस्य जीवनकथां के न जानन्ति? | 1× 2 = 2 |
| | **(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) महापुरुषाः कथं लक्ष्यं साधितवन्तः?<br>(ii) सत्यमाश्रित्याः केन युज्यन्ते ?<br>(iii) कः केषां सचेतसाम् अपरिचितः? | 2 × 2 = 4 |
| | **(स) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'प्रशंसनीयाः' इत्यस्य विलोमपदं चित्वा लिखत ?<br>(ii) प्रसिद्धार्थे अत्र किं पर्यायपदं प्रयुक्तम्?<br>(iii) 'ख्यातनामानो महापुरुषाः' इत्यत्र विशेषणपदं किम्? | 1 × 2 = 2 |
| | **(द) अनुच्छेदस्यास्य समुचितं शीर्षकं लिखत -** | 2 ×1 = 2 |
| | | |
| | **खण्डः – ख**<br>**रचनात्मक-कार्यम्** 15 अङ्काः | |
| | | |
| 3. | **अधोलिखितानि वाक्यानि कथोचितक्रमेण पुनः विन्यसत -**<br>(i) क्रौञ्चं मृतं दृष्ट्वा क्रौञ्ची विलापम् आरभत ।<br>(ii) करुणाद्रवितचेतसः मुनेः मुखात् सहसा श्लोकः निर्गतः ।<br>(iii) मुनिः वाल्मीकिः एकदा स्नानार्थं सरित्तटं जगाम ।<br>(iv) तस्याः विलापशब्दैः वाल्मीकेः चित्तं द्रवितम् अभूत् ।<br>(v) तदैव कश्चिद् व्याधः तत्र क्रीडतः क्रौञ्चमिथुनात् एकं बाणेन अविध्यत् । | 1 × 5 = 5 |
| | | |
| 4. | **मञ्जूषायां प्रदत्तपदानां सहायतया स्वयं वा पञ्चभिः संस्कृतवाक्यैः कमपि एकम् अधोलिखितं विषयम् अधिकृत्य वर्णनं कुरुत –**<br>**विषयः – जलम्** | 1×5=5 |

| | | |
|---|---|---|
| | **मञ्जूषा-**<br>जीवनम्, प्राणिनाम्, जलम्, विना, वृक्षाः, शुष्काः, जलस्य, एकैकः, बिन्दुः, अमूल्यः, संरक्षणम्, सर्वैः, कर्तव्यम्, सम्प्रति, महान् अभावः, अपव्ययः, न, करणीयः ।<br>**अथवा**<br>**विषयः - वर्षाकालः**<br>सम्प्रति, आगतः, वनस्पतिः, पुनरुज्जीवितः, घर्मकालात्, दीनाः प्रपीडिताः, खाद्यान्नानि, दुर्लभानि, जातानि, मुक्तिः, जलाप्लावः, रोगाः, प्रसृताः। | |
| | | |
| 5. | **निम्नलिखितवाक्येषु वाक्यानां संस्कृतेन अनुवादं कुरुत -**<br>1. राहुल प्रतिदिन खेलने के लिए जाता है ।<br>2. वह शाम को मित्रों के साथ खेलता है ।<br>3. उसे क्रिकेट बहुत पसंद है ।<br>4. वह समय-समय पर क्रिकेट मैच भी देखता है ।<br>5. खेलने के अलावा राहुल पढ़ाई भी मन लगाकर करता है ।<br><br>1. Rahul goes to play every day.<br>2. He plays with his friends in evening.<br>3. He likes cricket very much.<br>4. He also watches cricket matches time to time.<br>5. Apart from playing, Rahul studies too whole-heartedly. | 1 × 5 = 5 |
| | | |
| | **खण्डः – ग**<br>**पठितांश - अवबोधनम्** 50 **अङ्काः** | |
| | | |
| 6. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>"एवं चतुर्णां परस्परं विवादो लग्नः। ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तम् अकथयत् । राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ। इति कथां कथयित्वा पुत्तलिका राजानमवदत्, 'भो राजन्, त्वयि एवंविध-सहजमौदार्यं विद्यते चेदस्मिन् सिंहासने समुपविश"। तच्छ्रुत्वा राजा तूष्णीमासीत् ।"<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) केषां विवादो लग्नः?<br>(ii) ब्राह्मणः किम् अकथयत्?<br>(iii) 'भो राजन्!' इति का सम्बोधयति?<br>**(ब) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नमेकम्)** | 5<br><br><br><br><br>½ × 2 = 1<br><br><br><br>2 × 1 = 2 |

www.careerindia.com

| | | |
|---|---|---|
| | (i) राजा ब्राह्मणाय किं ददौ?<br>(ii) कः तूष्णीमासीत्?<br>**(स) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'सहजम् औदार्यम्' इत्यत्र विशेषणपदं किम्?<br>(ii) 'मौनम्' – इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?<br>(iii) ददौ इति क्रियापदस्य कर्तृपदं किम्? | 1 × 2 = 2 |
| | | |
| 7. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**<br>**पापान्निवारयति, योजयते हिताय,**<br>**गुह्यं निगूहति, गुणान् प्रकटी करोति ।**<br>**आपद्गतं च न जहाति, ददाति काले**<br>**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥**<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) सन्मित्रं कस्मात् निवारयति?<br>(ii) सन्मित्रं कस्मै योजयते?<br>(iii) सन्मित्रलक्षणं के वदन्ति?<br>**(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)**<br>(i) किं सन्मित्रलक्षणं सन्तः प्रवदन्ति?<br>(ii) कः पापात् निवारयति?<br>**(स) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'विद्वांसः' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्?<br>(ii) 'गृह्णाति' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?<br>(iii) प्रवदन्ति इति क्रियापदस्य कर्तृपदं किम्? | 5<br><br>½ × 2 = 1<br><br>2 × 1 = 2<br><br>1 × 2 = 2 |
| | | |
| 8. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**<br>"बटवः – पश्यतु कुमारस्तावदाश्चर्यम्?<br>लवः – दृष्टमवगतं च नूनमाश्वमेधिकोऽयमश्वः ।<br>बटवः – कथं ज्ञायते ?<br>लवः – ननु मूर्खाः ! पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो निषङ्गिणश्च रक्षितारः । यदि च विप्रत्ययस्तत् पृच्छत।"<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कुमारः किं पश्यतु?<br>(ii) कोऽयम् अश्वः?<br>(iii) "कथं ज्ञायते?" इति के वदन्ति? | 5<br><br>½ × 2 = 1 |

CAREERINDIA

| | | |
|---|---|---|
| | **(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)**<br>(i) रक्षिताः कीदृशाः?<br>(ii) बटवः लवं किं द्रष्टुं निवेदयन्ति?<br>**(स) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'पश्यतु' इति क्रियायाः कर्तृपदं किम्?<br>(ii) 'युष्माभिः' इति कर्तृपदस्य क्रियापदं किम् ?<br>(iii) विज्ञाः इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत। | $2 \times 1 = 2$<br><br><br>$1 \times 2 = 2$ |
| 9. | **पदानां समुचितार्थैः मेलनं कृत्वा लिखत – (केषाञ्चित् चतुर्णाम्)**<br>(i) अध्वरः — श्रुत्वा<br>(ii) नीरजम् — कमलम्<br>(iii) निसर्गतः — यज्ञः<br>(iv) निशम्य — स्वभावतः<br>(v) सुधा — वक्रता<br>(vi) कुटिलता — अमृतम् | ½ × 4 = 2 |
| 10. | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –(केषुचित् चतुर्षु)**<br>(i) पश्यतु कुमारस्तावद् <u>आश्चर्यम्</u> ।<br>(ii) अहो ! <u>सन्दीपनानि</u> अक्षराणि ।<br>(iii) नाशयति च <u>पुरुषम्</u> अत्यासंगो विषयेषु ।<br>(iv) विभूषणं मौनम् <u>अपण्डितानाम्</u> ।<br>(v) योगः <u>कर्मसु</u> कौशलम् ।<br>(vi) विभूषणं मौनम् <u>अपण्डितानाम्</u> । | $1 \times 4 = 4$ |
| 11. | **अधोलिखित – भावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषापद सहायतया कुरुत – (कयोश्चिद् द्वयोः)**<br>**(अ) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**<br>**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम् ॥**<br>**भावार्थः –** इदं समस्तं (i) ……….. विश्वम् ईश्वरेण व्याप्तं विद्यते । अतः (ii) ………………..<br>भोगं कुरु । कस्यापि अन्यस्य (iii) …………….. लोभं मा कुरु ।<br><br>**(आ) सहसा विदधीत न क्रियाम्**<br>**अविवेकः परमापदां पदम् ।**<br>**वृणते हि विमृश्यकारिणं**<br>**गुणलुब्धाः स्वयमेव सम्पदः ॥**<br><br>**भावार्थः –** किमपि कार्यं….. नैव करणीयम् । सहसा कार्यविधानं (ii) ………… कारणं भवति<br>सुविचार्य कार्यकतृणां पार्श्वे सर्वाः (iii) …….. स्वयमेव समाकृष्टाः भूत्वा समागच्छन्ति । | $3 + 3 = 6$ |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | **(इ) अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।**<br>**रमते न मरालस्य मानसं मानसं विना ॥**<br><br>**भावार्थः** – यद्यपि तडागेषु सर्वत्र जलं (i) ………. शोभितम् अस्ति , तथा हंसस्य (ii) ………..<br>मानसरोवरे एव (iii) …………………….. करोति ।<br><br>**मञ्जूषा -**<br><br>कमलैः, धनेषु, चराचरम्, मानसम्, त्वरया, अनासक्तिपूर्वकम्, रमणम्, सम्पत्तयः, विपत्तेः । | |
| | | |
| 12. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - (केवलं पद्यमेकम्)**<br>**(अ)** विपदि धैर्यमथाभ्युदये क्षमा<br>सदसि वाक्पटुता युधि विक्रमः ।<br>यशसि चाभिरुचिर्व्यसनं श्रुतौ<br>प्रकृतिसिद्धमिदं हि महात्मनाम् ॥<br><br>**अन्वयः** – विपदि धैर्यम्, अथ अभ्युदये क्षमा, सदसि (i) …… युधि विक्रमः, यशसि अभिरुचिः, श्रुतौ<br>(ii) …………………….. च इदं हि (iii) …………………….. प्रकृतिसिद्धम् ।<br><br>**(आ) ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।**<br>**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यचिद् धनम्॥**<br><br>**अन्वयः – यत् किं च** (i) …… जगत्, इदं सर्वं(ii) ………. वास्यम् । तेन त्यक्तेन भुञ्जीथाः<br>(iii) …………………….. धनं मा गृधः । | 1 × 3 = 3 |
| | | |
| 13. | **यथानिर्देशम् उत्तरत –**<br>**(अ) कर्तृपदं क्रियापदं च चिनुत -**<br>(i) सन्ति सन्तः कियन्तः?<br>(ii) सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।<br>(iii) एतावदेव अहं जानामि।<br>**(आ) विशेषणं विशेष्यं च चिनुत - (केवलं द्वयम्)**<br>(i) अतिगहनं तमो यौवनप्रभवम् ।<br>(ii) अपरिणामोपशमो दारुणो लक्ष्मीमदः ।<br>(iii) खेलतां वटूनां कोलाहलः।<br>**(इ) अधोलिखितवाक्ययोः सर्वनामपदे काभ्यां प्रयुक्ते? (केवलं द्वयम्)**<br>(i) **तम्** अध्वरे विश्वजिति क्षितीशम्?<br>(ii) **तं** दर्शनार्थमागतं शुकनासः उवाच ।<br>(iii) अहो ! **एतेषां** मध्ये कः एषः? | 2×5=10<br>1 × 2 = 2<br><br><br><br>1 × 2 = 2<br><br><br><br>1 × 2 = 2 |

www.careerindia.com

| | | |
|---|---|---|
| | **(ई) कः कं कथयति? (केवलं द्वयम्)**<br>(i) भो भोः! तत् किम् अक्षत्रिया पृथिवी ?<br>(ii) भो पुत्तलिके! कथय तस्य औदार्यम् !<br>(iii) पश्यतु कुमारस्तावदाश्चर्यम् ।<br>**(उ) समानार्थकं पदं चिनुत -(केवलं द्वयम्)**<br>(i) **<u>मूर्खः</u>**<br>'विभूषणं मौनमपण्डितानाम्'<br>(ii) **<u>प्रयासः</u>**<br>'कूपखननं प्रत्युद्यमः कीदृशः'<br>(iii) **<u>विद्वान्</u>**<br>"प्राज्ञः खलु कुमारः" | $1 \times 2 = 2$<br><br><br><br>$1 \times 2 = 2$ |
| | | |
| 14. | **(क) अधोलिखित-लेखकानां कस्याप्येकस्य काव्यस्य नाम लिखत –**<br>कालिदासः, वाल्मीकिः, बाणभट्टः, शूद्रकः, सुबन्धुः<br>**(ख) अधोलिखितरचनानां लेखकानां नामानि लिखत - (केवलं पञ्चानाम्)**<br>वेणीसंहारः, रसगंगाधरः, विक्रमोर्वशीयम्, मालतीमाधम्, हर्षचरितम्, किरातार्जुनीयम्, दशकुमारचरितम् | $1 \times 5 = 5$<br><br>$1 \times 5 = 5$ |
| | | |

**खण्डः – घ**

**छन्दोऽलंकारपरिचयः 20 अङ्काः**

| | | |
|---|---|---|
| 15. | **(अ) प्रश्नान् उत्तरत - (केवलं द्वयम्)**<br>(i) रगणस्य रूपं लिखत ।<br>(ii) 'मानवः' इत्यत्र को गणः?<br>(iii) जगणस्य किं स्वरूपम्?<br>**(ब) अधोलिखितपरिभाषाः पूरयत - (केवलं चतस्रः)**<br>(i) ज्ञेया वसन्ततिलका …………………….. ।<br>(ii) रसै रुद्रैश्छिन्ना …………………….. ।<br>(iii) …………………….. मालिनी भोगिलोकैः ।<br>(iv) …………………….. शार्दूलविक्रीडितम् ।<br>(v) मन्दाक्रान्ताम्बुधि………………….. ।<br>**(स) अधोलिखित पङ्क्तिषु किं किं छन्दः? (केवलं द्वयम्)**<br>(i) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।<br>(ii) निजहृदि विकसन्तः सन्ति सन्तः कियन्तः?<br>(iii) कश्चित् कान्ता विरहगुरुणा स्वाधिकारात् प्रमत्तः | $1 \times 2 = 2$<br><br><br><br><br>$1 \times 4 = 4$<br><br><br><br><br><br>$1 \times 2 = 2$ |

www.careerindia.com

| | | |
|---|---|---|
| | (द) एकस्य छन्दसः उदाहरणं लिखत -<br>उपजातिः, वंशस्थम्, मन्दाक्रान्ता | $2 \times 1 = 2$ |
| | | |
| 16. | 16. (अ) कस्यचिदेकस्य शब्दालंकारस्य सोदाहरणं लक्षणं लिखत -<br>यमकः, श्लेषः<br>(ब) केवलमेकस्य अर्थालंकारस्य लक्षणमुदाहरणं च लिखत -<br>उत्प्रेक्षा, अर्थान्तरन्यासः<br>(स) अधोलिखितपङ्क्तिषु के अलङ्काराः? (केवलं द्वयम्)<br>(i) शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ।<br>(ii) सूक्ष्ममौक्तिकपटलेनेव स्वेदबिन्दुव्रजेन ।<br>(iii) मानसं मानसं विना<br>(द) अधोलिखित-परिभाषा-द्वयं पूरयत - (केवलं द्वयम्)<br>(i) ........................ ऽनुषक्तार्थान्तराभिधा ।<br>(ii) तद् रूपकमभेदो यः ........................ ॥<br>(iii) .................. अनुप्रासः। | $3 \times 1 = 3$<br>$3 \times 1 = 3$<br>$1 \times 2 = 2$<br>$1 \times 2 = 2$ |

------------------------OoO-------------------------

CAREERINDIA
www.careerindia.com